'समानो मन्त्रः समितिः समानी'

# UNIVERSITY OF NORTH BENGAL

B.A. Honours 3rd Semester Examination, 2022

## CC7-SANSKRIT (307)

Time Allotted: 2 Hours | Full Marks: 60

*The figures in the margin indicate full marks.*

### विभाग-क

1. संस्कृतभाषया देवनागरीलिप्या च अधोलिखितेषु छन्दःसु द्वयोः सोदाहरणं लक्षणम् आलोचयत– 6×2 = 12

(क) रुचिरा (ख) स्रग्धरा (ग) शालिनी (घ) मन्दाक्रान्ता

2. संस्कृतभाषया देवनागरीलिप्या च द्वयोः गणनिर्देशपूर्वकं सलक्षणं छन्दोनिर्णयं कुरुत – 3×2 = 6

(क) न तज्जलं यन्न सुचारुपङ्कजम्।

(ख) क्षीयन्ते खलु भूषणानि सततं, वाक्भूषणं भूषणम्।

(ग) प्रस्निग्धा क्वचिदिङ्गुदीफलभिदः सूच्यन्त एवोपलाः।

3. संस्कृतभाषया देवनागरीलिप्या च प्रश्नद्वयं समाधेयम् – 3×2 = 6

(क) गुरुस्वरस्य लक्षणविषये गङ्गादासकृता कारिका लेखनीया।

(ख) किं नाम अर्धसमवृत्तम् ? सलक्षणं लिखत।

(ग) गणः कः ? कतिविधः गणः गङ्गादासेन अङ्गीकृतः ?

### विभाग-ख

4. कस्यचिदेकस्य प्रश्नस्य उत्तरं प्रदेयम् – 12×1 = 12

(क) का नाम सन्धिः ? सन्धेः प्रकारभेदमुल्लिख्य केषाञ्चित् त्रयाणां भेदानाम् आलोचना कार्या।

(ख) का नाम प्रस्तावना ? साहित्यदर्पणदिशा सभेदं पर्यालोचयत।

5. कस्यचिदेकस्य टिप्पणी लेखनीया – 6×1 = 6

विन्दुः, पताकास्थानम्, विष्कम्भकः।

6. संस्कृतभाषायां देवनागरीलिप्याञ्च त्रयाणां सलक्षणं सोदाहरणं च व्याख्यां कुरुत – $4\times3 = 12$

   समासोक्तिः, उत्प्रेक्षा, लाटानुप्रासः, दृष्टान्तः, मालोपमा, अपह्नुतिः।

7. संस्कृतभाषायां देवनागरीलिप्याञ्च द्वयोः श्लोकार्थमालोच्य अलंकारनिर्णयं कुरुत – $3\times2 = 6$

   (क) मधुरः सुधावदधरः पल्लवतुल्योऽतिपेलवः पाणिः।
   चकितमृगलोचनाभ्यां सदृशी चपले च लोचने तस्याः॥

   (ख) राजीवमिव राजीवं जलंजलमिवाजनि।
   चन्द्रश्चन्द्र इवातन्द्रः शरत्समुदयोद्यमे॥

   (ग) नवपलाश-पलाशवनं पुरः स्फुटपराग-परागत-पङ्कजम्।
   मृदुल-तान्त-लतान्तमलोकयत् स सुरभिं सुरभिं सुमनोहरैः॥

——×——